॥ श्रीः ॥

# ॥ श्रीगणाधिपपञ्चरत्नम् ॥

सरागलोकदुर्लभं विरागिलोकपूजितं
सुरासुरैर्नमस्कृतं जरापमृत्युनाशकम् ।
गिरा गुरुं श्रिया हरिं जयन्ति यत्पदार्चका
नमामि तं गणाधिपं कृपापयःपयोनिधिम् ॥ १

गिरीन्द्रजामुखाम्बुजप्रमोददानभास्करं
करीन्द्रवक्त्रमानताघसङ्घवारणोद्यतम् ।
सरीसृपेशबद्धकुक्षिमाश्रयामि सन्ततं
शरीरकान्तिनिर्जिताब्जबन्धुबालसन्ततिम् ॥ २

शुकादिमौनिवन्दितं गकारवाच्यमक्षरं
प्रकाममिष्टदायिनं सकामनम्रपङ्क्तये ।
चकासतं चतुर्भुजैर्विकासिपद्मपूजितं
प्रकाशितात्मतत्त्वकं नमाम्यहं गणाधिपम् ॥ ३

नराधिपत्वदायकं स्वरादिलोकनायकं
ज्वरादिरोगवारकं निराकृतासुरव्रजम् ।
कराम्बुजोल्लसत्सृणिं विकारशून्यमानसै-
र्हृदा सदा विभावितं मुदा नमामि विघ्नपम् ॥ ४

श्रमापनोदनक्षमं समाहितान्तरात्मनां
सुमादिभिस्सदार्चितं क्षमानिधिं गणाधिपम् ।
रमाधवादिपूजितं यमान्तकात्मसम्भवं
शमादिषड्गुणप्रदं नमाम्यहं विभूतये ॥ ५

गणाधिपस्य पञ्चकं नृणामभीष्टदायकं
प्रणामपूर्वकं जनाः पठन्ति ये मुदा युताः ।
भवन्ति ते विदां पुरः प्रगीतवैभवा जवा-
च्चिरायुषोऽधिकश्रियः सुसूनवो न सम्शयः ॥ ६

इति श्री सच्चिदानन्दशिवाभिनवनृसिंहभारतीविरचितं
श्रीगणाधिपपञ्चरत्नं सम्पूर्णम् ॥

